# श्रीसिद्धचक्रयन्त्रोद्धारविधि - व्याख्या ॥

सं. विजयशीलचन्द्रसूरि

श्रीसिद्धचक्रयन्त्र ए जैन धर्मनुं एक विशिष्ट आराध्य यन्त्र छे. पांच परमेष्ठी अने ४ ज्ञानादि गुणो एम नव पदोनां तात्त्विक अने तान्त्रिक संयोजनथी निर्मित आ यन्त्रनी विशिष्ट-विस्तृत उपासनानी प्रक्रिया जैन संघमां आजे पण प्रवर्तमान छे. आ यन्त्रनी उपासनानी ऐतिहासिक विगतो माटे इतिहासवेत्ता पं. श्रीकल्याणविजयजी कृत 'निबन्धनिचय'नो आ विषयनो लेख जोवो जरूरी छे.

सिद्धचक्रनो सीधो सम्बन्ध श्रीपाल-मयणानी कथा साथे जोडायेलो छे. आ बन्ने पात्रोनी कथा, सर्व प्रथम, नागपुरीय बृहत्तपागच्छना श्रीरत्नशेखरसूरिए रचेल 'सिरिसिरिवालकहा' (१५मो शतक) मां उपलब्ध थाय छे. ते पूर्वेना श्वेताम्बरसंघना कोई पुरुषे आ बे पात्रो विषे कांई लख्युं होय अथवा आगमोमां ते पात्रोनो कोई उल्लेख होय तेवुं जाणवामां आवतुं नथी. जैनो द्वारा थता नित्यपाठना सूत्ररूप 'भरहेसर'नी सज्झायमां पण आ बेनां नामो गेरहाजर ज छे.

श्रीरत्नशेखरसूरिए 'सिरिसिरिवालकहा'मां श्रीपाल-मयणानी कथा रसप्रद रूपे गुंथी छे. तेमां ज, प्रसंगोपात्त, सिद्धचक्रयन्त्रनुं स्वरूप पण तेमणे दर्शाव्युं छे. ते वर्णननी मुख्य १२ गाथाओ छे, जेनो अर्थबोध जैन तन्त्रविद्याना जाणकारोने ज थई शके तेवी ते गहन छे. ते अर्थो तथा उपासनाविधिना आम्नायनुं रहस्योद्घाटन, कर्ताना ज शिष्य आचार्य श्रीचन्द्रकीर्तिसूरिए (१६मो शतक) ते गाथाओनी सरल अने सुगम व्याख्या करीने करेल छे.

आ व्याख्या प्रमाणेनी उपासनाविधि साथे वर्तमानमां प्रचलित उपासना(पूजन) पद्धतिने सरखाववामां आवे तो महदंशे साम्य जोवा मळे छे. अथवा बीजी रीते एम कही शकाय के आ व्याख्या द्वारा उपलब्ध थती पद्धतिनो विनियोग प्रवर्तमान पूजनविधिमां करी शकाय, अने ते रीते केटलीक प्रवेशेली विकृतिओने दूर करी शकाय.

बे पत्रनी, सम्भवतः १७मा सैकामां लखायेली, निजी संग्रहनी एक प्रतिना आधारे आ सम्पादन करवामां आव्युं छे. आकृतिओ प्रतिलेखके ज आलेखी बतावेल छे. गा. ५नी व्याख्यामां निर्दिष्ट 'लब्धिकल्प'नो सम्बन्ध सूरिमन्त्रकल्प

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साथे होवानुं सम्भवित छे.

*

ॐ नमः सिद्धं ॥

**गयणमकलिआयंतं उड्ढाहसरं सनायबिंदुकलं ।**
**सपण[व]क्रोंवबीया-णाहय मंतसरं सरह पीढम्मि ॥१॥**

अथ ग्रन्थकारो द्वादशभिर्गाथाभिः श्रीसिद्धचक्रोद्धारविधिमाह । तत्रेयमादिगाथा-**गयण**मित्यादि । अत्र गगनादिसंज्ञा मन्त्रशास्त्रेभ्यो ज्ञेया । तत्र 'गगन' शब्देन 'ह' इत्यक्षरमुच्यते । **पीढ**मिति मूलपीठे यन्त्रस्य सर्वमध्ये 'ह' इत्यक्षरं स्मरत । इह च स्मरणमेवाऽधिकृतम् । स्मरणस्याऽशक्यत्वे पदस्थध्यानसाधनार्थं मनोज्ञद्रव्यैर्वहिका-पट्टादौ लिखनमपि पूर्वाचार्यैराम्नातम् । एवमन्येष्वप्यग्रेतनगाथागणोक्तेषु बीजेषु ध्यानादिकं स्वयमूह्यम् । तत्रादौ हकाराक्षरं लेख्यमिति प्रकृतम् । तत् कीदृशमित्याह - **अकलिआयंत**मिति । अस्य-अकाराक्षरस्य कलिका-व्याकरणसंज्ञामयी वक्रा 'ऽ' इत्यकाररूपी(पा) । तया आचान्तं-सहितं-आदौ अकलिकया युक्तम् । ततो 'ऽह' इति भवति । पुनर्गगनबीजं कीदृक् ? **उड्ढाहसरं** ति । उद्धर्वाधः सरं - सह रेण- रकाराक्षरेण वर्तते इति सरम् । हकारस्योद्धर्वमधश्च रो न्यस्यत इत्यर्थः । ततो 'ऽर्ह (र्ह्र)' इति जातम् । पुनः कीदृशं गगनम् ?-**सनायबिंदुकलं** ति । नाद इत्यर्द्धचन्द्राकारोऽनुनाशिकः, तन्न्यासः । बिन्दुकला च पूर्णोऽनुस्वारः । ततो नादश्च बिन्दुकला च-एताभ्यां सहितम् । ततो 'ऽर्ह्रँ' इति जातम् । पुनः कीदृशम् ? - **सपणव**त्ति । सप्रणवबीजानाहतम् । प्रणव- ॐकारः, बीजं - ह्रींकारः, अनाहतं च कुण्डलाकारं  एतादृशं बीजम् । ततश्च द्वन्द्वः, तैः सहितम् । अत्राऽऽम्नायः -

ऽर्ह्रँमिति बीजं ॐकारोदरे न्यसेत् । एतच्च बीजद्वयं ह्रींकारोदरे न्यसेत् । ततश्च ह्रींकारस्येकारस्वरात् रेखां पश्चाद् वालयित्वा द्विःकुण्डलाकारेणाऽनाहतेन तद्बीजत्रयमपि वेष्टयेत् । तन्न्यासः  । पुनः कीदृक् ? - **अंतसरं** ति । अन्ते स्वरा-मातृकोक्ताः 'अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः' इति लक्षणाः षोडश यस्य तदन्तस्वरम् । पूर्वोक्तस्य सर्वतः स्वरान् न्यसेदित्यर्थः । इत्येता[व]त् कर्णिकायां ध्यायतेत्यर्थः ॥ इति प्रथमगाथा ॥१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**झायह अडदलवलये सपणवमायाइए सवाहंते ।**
**सिद्धाइए दिसासुं विदिसासुं दंसणाइ( ई )ए ॥२॥**

अथ **झायह** त्ति । इति पीठं लिखित्वा तत्पार्श्वे वृत्तं मण्डलं लिखेत् । तदुपरि अष्टदलकमलाकारं वलयं लिखेत् । तत्राऽष्टदलवलये चतुर्दिक्पत्रेषु प्रणव-मायादिकान् स्वाहान्तान् सिद्धादिकान् चतुर्थीबहुवचनान्तान् **इत्याम्नायः** । ईदृशान् ध्यायेत् । तत्र प्रणवः-ॐकारो, माया-ह्रींकारः, तावादौ येषां ते तान् ।

ॐ ह्रींसिद्धेभ्यः स्वाहा । पूर्वस्याम् । ॐ ह्रींआचार्येभ्यः स्वाहा । दक्षिणस्याम् । ॐ ह्रीं उपाध्यायेभ्यः स्वाहा । पश्चिमायाम् । ॐ ह्रीं सार्वसाधुभ्यः स्वाहा । उत्तरदिग्दले लिखेत् ॥ तथैव विदिक्षु दर्शनादीनि चत्वारि पदानि क्रमेण लिखेत् — ॐ ह्रींदर्शनाय स्वाहा । आग्नेयकोणे । ॐ ह्रीं ज्ञानाय स्वाहा । नैर्ऋत्याम् । ॐ ह्रीं चारित्राय स्वाहा । वायवे(व्याम्) । ॐ ह्रीं तपसे स्वाहा । ईशानकोणे ॥ एवमष्टदलं प्रथमवलये ॥२॥

**बीयवलयम्मि अडदिसि दलेसु साणाहए सरह वग्गे ।**
**अंतरदलेसु अट्ठसु झायइ परमिट्ठिपढमपए ॥३॥**

**बीयवलयम्मि**त्ति गाथा । प्रथमवलयबाह्यतो मण्डलाकारं षोडशदलं न्यसेत् । तत्र द्वितीयवलयेऽष्टस्वेकान्तरितदिग्दलेषु सानाहतान् – अनाहतबीजसहितान् अष्टौ वर्गान् – 'अ-क-च-ट-त-प-य-श' रूपान् क्रमेण लिखेत् । तत्र प्रथमवर्गे षोडश वर्णाः । कवर्गादिषु पञ्चसु प्रत्येकं पञ्च पञ्च वर्णाः । अन्तिमवर्णद्वये प्रत्येकं चत्वारो वर्णाः । **अंतर**त्ति । अष्टसु वर्गाणामन्तरदलेषु परमेष्ठिप्रथमपदान् (नि) ध्याय(ये)त् । अष्टस्वेव प्रत्येकं 'ॐ नमो अरिहंताणं' इत्येकमेव पदं लिखेदित्यर्थः । एवं द्वितीयवलए (ये) ॥३॥

**तई( इ )यवलए वि अडदिसि दिट्ठंत अण( णा )हएहिं अंतरिए ।**
**पायाहिणतित्थ( य? )पंतिआहिं झाएह दलट्ठिएएए ॥४॥**

**तईयवलयम्मि**त्ति । तृतीयवलयेऽष्टसु दिक्षु अष्टावनाहतान् लिखेत् । तांश्च त्रिपङ्क्तिव्यापकान् लिखेत् । द्वयोर्द्वयोरन्तरे द्वे द्वे लब्धिपदे, एवमष्टस्वप्यन्तरेषु षोडश लब्धिपदानि प्रथमपङ्क्तौ । एवं षोडशैव द्वितीयपङ्क्तौ । एवमेव च तृतीयपङ्क्तौ । प्रादक्षिण्येन त्रिभिः पङ्क्तिभिरष्टचत्वारिंशल्लब्धिपदानि ध्यायत ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org




**ते पणवबीय अरिहं नमो जिणाणं ति एअ साहीय ।**
**अडयालीसं णेया सम्मं सुगुरूवएसेणं ॥५॥**

**ते पणव**त्ति गाथा । ते इति प्राकृतत्वान्नपुंसकस्य पुंस्त्वम् । तानि लब्धिपदानि प्रणव-ॐकारो मायाबीजं-ह्रींकारोऽर्हमिति सिद्धबीजम् । एतत्पूर्वकं 'नमो जिणाण' मिति पदम् । ॐ ह्रीं अर्हं नमो जिणाणं' इत्येवमादीन्यष्टचत्वारिंशत्संख्यानि सम्यक् सुगुरूपदेशेन ज्ञेयानि । एतेषां नामानि माहात्म्यानि च **लब्धिकल्पा**दवसेयानि । इह त्वाराधनविधिना पुस्तकलिखने दोष इति न लिखितानि ॥५॥

**तं तिगुणेणं माया-बीएणं सुद्धसेअवन्नेणं ।**
**परिवेढिऊण परिहिइ तस्स गुरुपाउए नमह ॥६॥**

**तं तिगुणेणं** ति गाथा । तत् – पीठादिलब्धिपदान्तं त्रिगुणेन शुद्धश्वेतवर्णेन मायाबीजेन-ह्रींकारेण परिवेष्टयित्वा तस्य परिधौ गुरुपादुका नमत । अत्रायं भावः-सर्वयन्त्रस्योद्ध्वं ह्रींकारं विलिख्य तस्येका[रा]त् सर्वयन्त्रपरिक्षेपरूपां रेखां त्रिर्वालयित्वा चतुर्थरेखार्द्धप्रान्ते **क्रौं** इत्यक्षरं लिखेत् । तस्य च परिधौ गुरुपादुका लिखेत् ॥६॥

ता एवाऽऽह-

**अरिहं-सिद्ध-गणीणं गुरु-परमा-ऽदिट्ठ-णंत-सुगुरूणं ।**
**दुरणंताण गुरूणं सपणवबीआउ ताओ अ ॥७॥**

**अरिहंसिद्धगणीण**मिति गाथा । अर्हतां पादुकाः १, सिद्धानां २, गणीणंति आचार्याणां ३, गुरूणां ४, परमगुरूणां ५, अदृष्टगुरूणां ६, अनन्तगुरूणां ७, **दुरणंताणं**ति अनन्तानन्तगुरूणां ८, इत्येवमष्टानामपि ताः पादुकाः सप्रणव-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बीजाः- ॐ ह्रीं युक्ताः- ॐ ह्रीं अर्हत्पादुकाभ्यो नमः १ इत्यादिकास्तत्र लिखेदित्यर्थः ॥७॥

**रेहादुगकयकलसा-यारामिअमंडलं व तं सरह ।**
**चउदिसि विदिसि कमेणं जयाइ-जंभाइकयसेवं ॥८॥**

**रेहादुग**त्ति । रेखाद्विकेन यन्त्रार्द्धभागाद् वाम-दक्षिणनिर्गतान्योन्यग्रथित-प्रान्तरेखाद्विकेन कृतं यत् कलशाकारममृतमण्डलं तदिव स्मरत कलशाकारं लिखेदित्यर्थः । किंविशिष्टं यन्त्रम् ?, **चउदिसि**त्ति । चतुर्दिक्षु विदिक्षु च क्रमेण जयादिभिश्चतसृभिः जया १ विजया २ जयन्ती ३ अपराजिता ४भिः तथा जम्भादिभिः जम्भा १ थम्भा २ मोहा ३ अन्धाभिः ४ कृता सेवा यस्य तत् । तत्र जयादिकाश्चतस्रः क्रमेण पूर्वादिदिक्षु जम्भादिकाश्चाझे(ग्ने)यादिविदिक्षु लिखेत् ॥८॥

**सिरिविमलसामिपमुहा-हिट्ठायगसयलदेवदेवीणं ।**
**सुहगुरुमुह्मउ जाणिअ ताण पयाणं कुणह झाणं ॥९॥**

**सिरिविमलसामि**त्ति गाथा । श्रीविमलस्वामीतिनाम्ना श्रीसिद्धचक्राधिष्टायक-स्तत्प्रमुखा येऽधिष्टायका देवा देव्यश्चक्रेश्वर्याद्यास्तासां ध्यानं सुगुरुमुखाद् ज्ञात्वा **ताण**त्ति-तत्सम्बन्धिनां **पयाणं** ति- मन्त्रपदानां ध्यानं कुरुत । एतेषां नामानि कलशाकारस्योपरि सर्वतो लिखेत् । 'ॐ श्रीविमलस्वामिने नमः' इत्यादि लिखेत् ॥९॥

**तं विज्जादिवि-सासण-सुर-सासणदेविसेविअदुपासं ।**
**मूलगहं कंठनिहिं चउपडिहारं च चउवीरं ॥१०॥**
**दिसिवाल-खित्तवालेहिं सेविअं धरणिमंडलपईवं ।**
**पूअंताण नराणं नूणं पूरेइ मणइट्ठं ॥११॥**

**तं विज्जादिवि**त्ति गाथा । तथा **दिसिवालखित्तवालेहिं**ति गाथा-युग्मस्य व्याख्या । तत् सिद्धचक्रं-कर्तृ, पूजयतां-नराणां नूनं-निश्चितं मनइष्टं-मनसोऽभीप्सितं पूरयति । कथम्भूतं तत् ?, विद्यादेव्यः षोडश रोहिण्याद्याः । शासनसुरा गोमुखयक्षाद्याः । शासनदेव्यश्चक्रेश्वर्याद्याः । ततो विद्यादेवीभिः शासनसुरैः शासनदेवीभिश्च सेवितौ द्वौ पार्श्वौ वाम-दक्षिणौ यस्य तत् । पुनः कीदृशम् ?,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**मूलगहं**ति । मूले-कलशस्य मूलदेशे ग्रहाः - सूर्यादयो यस्य तत् । तथा कण्ठे-गलस्थाने निधयो नव नैसर्प्पकाद्याः समयप्रसिद्धा यस्य तत् । तथा चत्वारः प्रतिहारद्वारपालाः कुमुदा १ ऽञ्जन २ वामन ३ पुष्पदन्ताख्या ४ यस्य तत् । तथा चत्वारो वीरा माणिभद्र १ पूर्णभद्र २ कपिल ३ पिङ्गलाख्या ४ यस्य तत् ईदृशम् । ततो विद्यादेव्यः षोडशापि 'ॐ ह्रीं रोहिण्यै नमः, ॐ ह्रीं प्रज्ञप्त्यै नमः' इत्यादि परितश्चक्रं लिखेत् । शासनसुरा(रां)श्च चक्रस्य दक्षिणदिशि लिखेत् । शासनदेवी (वीः) वामदिशि लिखेत् । तथा चक्रस्य मूले पतद्ग्रहाधः 'ॐ आदित्याय नमः' इत्यादिनवग्रहाणां नामानि लिखेत् । कण्ठे च वाम-दक्षिणतो नवाऽपि कलशान् कृत्वा तदुपरि 'ॐ नैसर्प्पकाय नमः' इत्यादि लिखेत् । तथा चतसृषु दिक्षु क्रमेण कुमुद १ अञ्जन २ वामन ३ पुष्पदन्तान् ४ लिखेत् । तथा माणिभद्रादींश्चतुरो वीरानप्येवं दिक्षु लिखेत् ॥१०॥

**दिसिवालखित्तवालेहिं** ति द्वितीया गाथा । दिक्पालैर्दशभिः इन्द्रा-ऽग्नि-यम-नैर्ऋति-वरुण-वायु-कुबेरे-शान-ब्रह्म-नागनामभिः क्षेत्रपालेन च सेवितम् । ततो(त्र) दशसु दिक्पालेष्वष्टौ दिक्पालान् पूर्वादिक्रमेण लिखेत् - ॐ इन्द्राय नमः' इत्यादि । ऊर्द्ध्वं तु 'ॐ ब्रह्मणे नमः', अधः 'ॐ नागाय नमः'। निजदक्षिणभागकोणे 'ॐ क्षेत्रपालाय नमो' लिखेदिति गाथाद्वयार्थः । तथाप्यस्य लिखने सम्यग्विधिश्चाऽस्याऽऽम्नायविन्मुखाद् यथालिखितचक्राद्वाऽवसातव्यः ॥११॥

**एयं च सिद्धचक्कं कहिअं विज्जाणुवायपरमत्थं ।**
**नाएण येण सहसा सिज्झंति महंतसिद्धीओ ॥१२॥**

**एयं** चेत्यादिगाथा । कण्ठ्या । नवरं **विद्यानुवादो** नाम नवमं पूर्वं, तस्य परमार्थरूपं रहस्यभूतमित्यर्थः ॥१२॥

इति श्रीमन्नागपुरीयतपागच्छनायक सुविहितशिरशेखर श्रीरत्नशेखरसूरि-विरचितायां श्रीश्रीपालराजा(ज)कथा[यां] सिद्धचक्रयन्त्रोद्धारगाथाद्वादशकस्य व्याख्या संक्षेपतो व्यधायि भ० श्रीचन्द्रकीर्तिसूरिभिः ॥ छ ॥

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org